यचनमोमेग्घ्यायचविद्युत्यायचनमोवर्ष्यायचावर्ष्यायचनमोवा
त्याय॥३८॥नमोवात्यायचरेष्म्म्यायचनमोवास्तव्यायचवास्तुपाय
चनमःसोमायचरुद्रायचनमस्ताम्रायचारुणायचनमःशङ्गवे॥ ३९ ॥
नमःशङ्गवेचपशुपतयेचनमउग्रायचभीमायचनमोअग्रेवधायचदूरे
वधायचनमोहन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्तारा
य ॥ ४० ॥ नमःशम्भवायचमयोभवायचनमःशङ्करायचमयस्करा
यचनमःशिवायचशिवतरायच ॥ ४१ ॥ नमःपार्यायचावार्यायच
नमःप्रतरणायचोत्तरणायचनमस्तीर्थ्यायचकूल्यायचनमःश

ष्प्प्यांयचुफेन्न्यांयचुनमं÷सिकुत्त्यांय॥४२॥ नमं÷सिकुत्त्यांयचप्प्रवा
ह्यायचुनमं÷किꣳशिलायंचक्षयुणायंचुनमं÷कपुर्द्दिनेंचपुलुस्तयेंचुन
मंऽइरिण्यांयचप्प्रपत्थ्यांयचुनमोव्व्रज्ज्यांय॥ ४३ ॥नमोव्व्रज्ज्यांयचुगो
ष्ठ्यांयचुनमुस्तल्प्प्यांयचुगेह्यांयचुनमोंहृदुय्यांयचनिवेष्प्यांयचु
नमुःकाट्यांयचगह्वरेष्ठायंचुनमुःशुष्क्यांय॥ ४४ ॥नमुःशुष्क्यांयच
हरित्यांयचुनमं÷पाꣳसव्यांयचरजुस्यांयचुनमोलोप्प्यांयचोलप्प्यां
यचुनमुऽऊर्व्यांयचुसूर्व्यांयचुनमं÷पुर्ण्णायं॥४५॥नमं÷पुर्ण्णायंचप
र्ण्णशुदायंचुनमंऽउद्गुरमांणायचाभिघ्नुतेचुनमंऽआखिदुतेचंप्प्रखिदु

तेच्चुनमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्चवोनमोनमोवःकिरिकेभ्योदेवानाꣳ
हृदयेभ्योनमोविचिन्वत्केभ्योनमोविक्षिणत्केभ्योनमऽआनिर्हतेभ्यः ॥४६॥ द्रापेऽअन्धसस्पतेदरिद्रनीललोहित ॥ आसाम्प्रजानामे
षाम्पशूनाम्माभेर्म्मारोङ्मोचनःकिञ्चनाममत् ॥ ४७ ॥ इमारुद्रायतवसेकपर्द्दिनेक्षयद्वीरायप्रभरामहेमतीः ॥ यथाशमसद्द्विपदेचतुष्पदेवि
श्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ यातेरुद्रशिवातनूःशिवा
विश्वाहाभेषजीशिवारुतस्यभेषजीतयानोमृडजीवसे ॥ ४९ ॥ परि
नोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्म्मतिरघायोः ॥ अवस्थिरामघ

वह्नच्यस्तनुष्वमीढ्वस्तोकायुतनयायमृड ॥ ५० ॥ मीढुष्टमुशिवतम
शिवोनं÷सुमनाभव ॥ पुरमेवृक्षऽआयुंधन्निधायकृतिंवसानुऽआचरपि
नाकुम्बि॰भ्रुदागहि ॥५१॥ विकिरिद्रुविलोहितुनमस्तेऽअस्तुभगवः ॥
यास्तैसुहस्त्रंठहेतयोन्यमुस्म्मन्निवंपन्तुताः ॥ ५२ ॥ सुहस्त्राणिसह
स्रशोबाह्वोस्तवंहेतयं÷॥तासामीशानोभगवःपराचीनामुखाकृधि ५३॥
असंड्ख्यातासुहस्त्राणियेरुद्राऽअधिभूम्म्यांम् ॥ तेषांठसहस्त्रयोजुनेवु
धन्न्वानितन्नमासि ॥ ५४ ॥ अस्मिन्न्महत्यर्णवुन्तारिक्षेभुवाऽअधि ॥
तेषांठसह० ॥५५॥ नीलंग्ग्रीवाःशितिकण्ठादिवंठरुद्राऽउपश्श्रिताः ॥

ल्पन्ताम् ॥१५॥ अग्निश्चंमुऽइन्द्रश्च ॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः ॥ अग्निश्चंमुऽइन्द्रंश्चमेसोमंश्चमुऽइन्द्रंश्च मेसविताचंमुऽइन्द्रंश्चमेसरंस्वतीचमुऽइन्द्रंश्चमेपूषाचमुऽइन्द्रंश्चमेबृहस्पतिंश्चमुइन्द्रश्चमेयुज्ञेनंकल्पन्ताम् ॥१६॥ मित्रश्चंमुऽइन्द्रंश्चमेवरुंणश्चमुऽइन्द्रंश्चमेधाताचंमुऽइन्द्रंश्चमेत्त्वष्टांचमुऽइन्द्रंश्चमेमुरुतंश्चमुऽइन्द्रश्चमेविश्वेंचमेदेवाऽइन्द्रंश्चमेयुज्ञेनकल्पन्ताम्॥१७॥ पृथिवीचंमुऽइन्द्रंश्चमेन्तरिंक्षश्चमुऽइन्द्रंश्चमेद्यौश्चंमुऽइन्द्रश्चमेसामांश्चमुऽइन्द्रंश्चमेनक्षंत्राणिचमुऽइन्द्रंश्चमेदिशंश्चमुऽइन्द्रंश्चमेयुज्ञेनंकल्पन्ता

मॣ॥१८॥अॖर्ठ॑शुश्च॥'नमस्ते'इत्यादि६६मन्त्रात्मको नमकाध्यायः पठ
नीयः।अॖर्ठ॑शुश्च॑मेरुश्मिश्च॒मेदा॑भ्यश्च॒मेधिपतिश्चम॒ऽउपा॒ठ॑शुश्च॑मेन्त
र्य्यामश्चम॒ऽऐन्द्रवायुवश्च॑मेमैत्रावरुणश्च॑म॒ऽआश्विनश्च॑मेप्प्रतिप्रस्त्था
नं॑श्च मेशुक्रश्च॑मेमुन्थीचं॑मेयुज्ञेनं॑कल्पन्ताम् ॥ १९ ॥ आग्ग्रयुणश्च॑मेवै
श्वदेवश्च॑मेद्ध्रुवश्च॑मेवैश्वानुरश्च॑म॒ऽऐन्द्राग्ग्नश्च॑मेमुहावैश्वदेवश्च मेमरु
त्वुतीया॑श्च॒मे॒निष्क्कैवल्ल्यश्चमेसावित्रश्च॑मेसारस्वुतश्च॑मेपात्क्नीवुतश्च
मेहारियोजुनश्च मेयुज्ञेनं॑कल्पन्ताम्॥२०॥स्रुच॑श्च मेचमुसाश्च॑मेवाय
व्या॑निचमेद्द्रोणकलुशश्च॑मेग्ग्रावा॑णश्च मेधिषवण॑चमेपूतुभृच्च॑म॒ऽआध

वुनीयं श्च मुेद्बोदिं श्च मेबुर्हिश्चं मेवभृथ श्चं मेस्वगाकुार श्चं मेयुज्ञेनंकल्प
न्ताम् ॥ २१ ॥ अुग्निश्चं मेघुर्म्मश्चं ॥ 'नमस्ते' इत्यादि ६६ म
न्त्रात्मको नमकाध्यायः पठनीयः॥अुग्निश्चं मेघुर्म्मश्चं मुेर्कश्चं मुेसूर्य्यं
श्च मेप्प्राण श्चं मेश्वमुेध श्चं मेपृथिवीचुमेदिंतिश्च मुेदितिं श्च मेद्यौ श्चं मुेऽङ्गु
लंयुःशक्कंरयोदिशं श्च मेयुज्ञेनंकल्पन्ताम् ॥ २२ ॥ व्रुतश्चमऽऋु
तवं श्च मुेतपं श्च मेसम्वत्सुर श्चं मेहोरात्रेऽऊंर्वष्ठीवेबृहद्रथन्तुरेचंमेयुज्ञेनं
कल्पन्ताम् ॥ २३ ॥ एकांच ॥ 'नमस्ते'इत्यादि ६६ मन्त्रा
त्मको नमकाध्यायः पठनीयः ॥ एकांचमेतिुस्रश्चं मेतिुस्रश्चं मुेपञ्चंच

मुप ञ्चचमेसुप्तचमेसुप्तचंमुनवचमुनवंचमुऽएकादशचमुऽएकादश
चमुत्रयौदशचमुत्रयौदशचमुपञ्चदशचमुपञ्चदशचमेसुप्तदशचमेसु
प्तदंशचमुनवंदशचमुनवंदशचमुऽएकंविर्ठशतिश्चमुऽएकंविर्ठशति
श्चमुत्रयौविर्ठशतिश्चमुत्रयौविर्ठशतिश्चमुपञ्चविर्ठशतिश्चमुपञ्चविर्ठ
शतिश्चमेसुप्तविर्ठशतिश्चमेसुप्तविर्ठशतिश्चमुनवंविर्ठशतिश्चमुनवं
विर्ठशतिश्चमुऽएकंत्रिर्ठशच्चमुऽएकंत्रिर्ठशच्चमुत्रयंस्त्रिर्ठशच्चमेयुज्ञेनं
कल्पन्ताम् ॥ २४ ॥ चतंस्त्रश्च ॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्म
को नमकाध्यायः पठनीयः ॥ चतंस्त्रश्चमुष्टौचमुष्टौचंमुद्वादशचमुद्वा

मनश्चमेचक्षुश्चमेश्श्रोत्रञ्चमेदक्षश्चमेबलञ्चमेयज्ञेनकल्पन्ताम् ॥२॥
ओजश्चमेसहश्चमऽआत्माचमेतनूश्चमेशर्म्मचमेवर्म्मचमेङ्गानिच
मेस्थीनिचमेपरूꣳषिचमेशरीराणिचमऽआयुश्चमेजराचमेयज्ञेनक
ल्पन्ताम् ॥ ३ ॥ ज्यैष्ठ्यञ्चमऽआधिपत्यञ्चमेमन्युश्चमेभामश्चमे
मश्चमेम्भश्चमेजेमाचमेमहिमाचमेवरिमाचमेप्प्रथिमाचमेवर्षिमा
चमेद्राघिमाचमे वृद्धञ्चमेवृद्धिश्चमेयज्ञेनकल्पन्ताम् ॥ ४ ॥ सत्य
ञ्च॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः॥ सत्य
ञ्चमेश्श्रद्धाचमेजगच्चमेधनञ्चमेविश्वञ्चमेमहश्चमेक्रीडाचमेमोदश्च

मेजुातश्चंमेजनिष्ष्यमाणश्चमेसूक्तश्चंमेसुकृतश्चंमेयुज्ञेनंकल्प्पन्ताम्॥
॥ ५ ॥ ऋतश्चंमेमृतंश्चमेयुक्ष्मश्चमेनांमयच्चमेजीवातुश्श्चमेदीर्ग्घायु
त्वश्चंमेनमित्रश्चमेभंयश्चमेसुषश्चंमेशयंनश्चमेसूषाश्चंमेसुदिनंश्चमेयु
ज्ञेनंकल्प्पन्ताम् ॥ ६॥ युन्ताचंमेधुर्त्ताचंमेक्षेमंश्चमेधृतिंश्चमेविश्श्वंश्च
मेमहंश्चमेसम्विच्चंमेज्ञात्रंश्चमेसूश्चंमेप्प्रसूश्चंमेसीरंश्चमेलयंश्चमेयुज्ञे
नंकंल्प्पन्ताम्॥७॥शश्चंमेमयंश्चमेप्प्रियश्चंमेनुकामश्चमेकामंश्चमेसौ
मनुसश्चंमेभगंश्चमेद्द्रविणश्चमेभुद्द्रश्चंमेश्श्रेयंश्चमेवसीयश्चमेयशंश्चमे
युज्ञेनंकल्प्पन्ताम्॥८॥ऊक्कर्च्चं॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नम

काध्यायःपठनीयः ॥ ऊर्क्चमेसूनृताचमेपयश्चमेरसश्चमेघृतञ्चमेमधु
चमेसग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृष्टिश्चमेजैत्रञ्चमऽऔद्भिद्यञ्चमे
यज्ञेनकल्पन्ताम् ॥९॥ रयिश्चमेरायश्चमेपुष्टञ्चमेपुष्टिश्चमेव्विभुचमेप्प्र
भुचमेपर्ण्णञ्चमेपर्ण्णतरञ्चमेकुयवञ्चमेक्षितञ्चमेन्नञ्चमेक्षुच्चमेयज्ञेनक
ल्पन्ताम् ॥ १० ॥ व्वित्तञ्चमेव्वेद्यञ्चमेभूतञ्चमेभविष्यच्चमेसुगञ्चमे
सुपथ्यञ्चमऽऋद्धञ्चमऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमेमतिश्चमेसुम
तिश्चमेयज्ञेनकल्पन्ताम् ॥ ११ ॥ व्व्रीहयश्चमेयवाश्चमेमाषाश्चमेतिला
श्चमेमुद्द्गाश्चमेखल्वाश्चमेप्प्रियङ्गवश्चमेणवश्चमेश्यामाकाश्चमेनी

वाराश्श्चमेगोधूमाश्चमेमुसूराँश्चमेयुज्ञेनंकल्पन्ताम् ॥ १२॥ अश्मा च॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः॥ अश्मां चमेमृत्तिकाचमेगिरयँश्चमेपर्वताश्चमेसिकताश्चमेवनस्पतयश्चमेहिरं ण्यञ्चमेयश्चमेश्यामञ्चमेलोहञ्चमेसीसञ्चमेत्रपुंचमेयुज्ञेनंकल्पन्ताम् ॥ १३ ॥ अग्निश्चंमऽआपश्चमेवीरुधश्चमऽओषधयश्चमेकृष्टपच्याश्चमेकृष्टपच्याश्चमेग्राम्म्याश्चमेपशवऽआरण्याश्चमेवित्तञ्चमेवित्तिश्चमेभूतञ्चमेभूतिश्चमेयुज्ञेनंकल्पन्ताम् ॥ १४ ॥ वसुंचमेवसतिश्च मेकर्म्मचमेशक्तिश्चमेर्थश्चमऽएमश्चमऽइत्याचंमेगतिश्चमेयुज्ञेनंक

तेषा० ॥ ५६ ॥ नीलग्ग्रीवाःशितिकण्ठाःशुर्व्वाऽअधःक्षमाचुराः ॥ तेषा० ॥ ५७ ॥ येवृक्षेषुशुष्पिञ्जरानीलग्ग्रीवाव्विलोहिताः ॥ तेषा० ॥ ५८ ॥ येभतानामधिपतयोव्विशिखासःकपुर्द्दिनः ॥ तेषां० ॥ ५९ ॥ येपुथाम्पथिरक्षयऽऐलवृदाऽआयुर्युधः ॥ तेषा० ॥ ६० ॥ येतीर्त्थानिप्प्रचरन्तिसृकाहस्तानिषुङ्गिणः ॥ तेषां० ॥ ६१ ॥ येन्नेषुव्विविद्ध्यन्तिपात्रेषुपिबतोजनान् ॥ तेषा० ॥ ६२ ॥ यऽएतावन्तश्चभूयांसश्चदिशोरुद्द्राव्वितस्त्थिरे ॥ तेषा० ॥ ६३ ॥ नमोस्तुरुद्द्रेभ्योयेदिवि येषांव्वर्षमिषवः ॥ तेभ्योदशप्प्राचीर्दशदक्षिणादशप्प्रतीचीर्दशोदीची

२० दिशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोय अ०
१६ श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६४ ॥ नमोस्तुरुद्रेभ्योयेन्तरिक्षेयेषां ५
वातऽइषवः ॥ तेभ्योदशप्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीची
र्द्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मो
यश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६५ ॥ नमोस्तुरुद्रेभ्योयेपृथिव्यां
येषामन्नमिषवः ॥ तेभ्योदशप्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशो
दीचीर्द्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्ततेनोवन्तुतेनोमृडयन्तुतेयन्द्वि १५
ष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६६ ॥ इतिसंहितायांरुद्र

पाठेपञ्चमोऽध्यायः ॥५॥ ॥६॥ ॥पुनर्नमस्तेइत्यादिषोडशकाण्डि
काःपठनीयाः ॥१६॥एषतेरुद्रभागःसहस्वस्राम्बिकयातञ्जुषस्वस्वाहै
षतेरुद्रभागऽआखुस्तेपशुः ॥१॥ अवंरुद्रमदीमह्यवंदेवन्त्र्यम्बकम् ॥य
थानोवस्यंसस्करद्यथानःश्रेयंसस्करद्यथानोव्यवसाययात् ॥२॥ नमं
स्तेरुद्रमन्यवऽउतोतऽइषवेनमंः ॥बाहुभ्यामुततेनमंः ॥३॥ यातेरुद्र
शिवातनूरघोरापापकाशिनी॥ तयानस्तन्वाशन्तमयागिरिशन्ताभि
चाकशीहि।४।नतम्विदाथयऽइमाजजानान्यद्युष्माकमन्तरम्बभूव।
नीहारेणप्रावृताजल्प्याचासुतृपऽउक्थशासश्चरन्ति।५। विश्वकर्म्मा

रु० ह्यजानिष्टदेवऽआदिद्वन्धुर्व्वोऽअभवद्द्वितीयः ॥ तृतीयः पिताजनितौष अ०
१६ धीनामुपाङ्गर्भम्व्यदधात्पुरुत्रा ॥ ६ ॥ मीढुष्टमशिवतमशिवोनः सुम ६
नाभव ॥ परमेवृक्षऽआयुधन्निधायकृत्तिँवसानऽआचरपिनाकम्बिभ्र
दागहि ॥७॥ विकिरिद्रविलोहितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्र
ꣳहेतयोन्यमस्मन्निवपन्तुताः ॥ ८॥ सहस्राणिसहस्रशोबाह्वोस्तव
हेतयः ॥ तासामीशानोभगवःपराचीनामुखाकृधि ॥ ९ ॥ अस
ङ्ख्यातासहस्राणियेरुद्राऽअधिभूम्याम्॥तेषाꣳसहस्रयोजनेवध १६
न्वानितन्मसि ॥ १० ॥ व्वयꣳसोमव्व्रतेतवमनस्तनूषुबिभ्रतः॥ प्रजा

वंन्तꣳसचेमहि ॥ ११ ॥ एषतरुद्रभागꣳसुहस्वस्राम्बिकयातअंषस्वु
स्वाहैषतैरुद्रभागऽआखुस्तैपशुः ॥ १२ ॥ अवंरुद्रमंदीमुह्यवदेवन्त्र्य
म्बकम्॥यथांनुोव्वस्यसुस्करुद्यथानुःश्रेयसुस्ककरुद्यथानोव्यवसुाय
यात् ॥ १३ ॥ भेषुजमंसिभेषुजङ्गवेश्वांयपुरुंषायभेषुजम् ॥ सुखम्मे
खायंमेष्ष्यै ॥१४॥ त्र्यंम्बकँय्यजामहेसुगुन्धिम्पुष्ट्टिवर्द्धनम् ॥ उुर्व्वा
रुकमिवुबन्धनान्मृत्यांर्मुक्षीयुमामृतांत् ॥१५॥ त्र्यंबकँय्यजामहेसुग
न्धिम्पतिुवेदनम् ॥ उुर्व्वारुकमिवुबन्धनादितोमुंक्षीयुमामुतः ॥१६॥
एतत्तैरुद्रावुसन्तेनपुरामूजवुतोर्तीहि।अवंततधन्वापिनांकावसुःक्कृत्ति

रु० वासुाऽआहिँर्ठ॑सन्नःशिवोतांहि ॥ १७ ॥ त्र्यायुषञ्जमदंग्नेःकुश्यप अ०

१७ स्यत्र्यायुषम् ॥ यद्देवेषुंत्र्यायुषन्तन्नोंऽअस्तुत्र्यायुषम् ॥१८॥ शिवोना ६

मासिुस्वधितिस्तेपितानमंस्तेऽअस्तुमामांहिर्ठ॑सीः ॥ निर्वर्त्तयाम्म्या

युंषेन्नाद्यायप्रजर्नंनायरायस्पोषांयसुप्प्रजास्त्वायंसुवीर्य्याय ॥१९॥

उग्ग्रश्चभीमश्चध्वान्तश्चधुनिश्च ॥सासुह्वांश्चाभियुग्ग्वाचंविक्षिपःस्वा

हा॥२०॥ अग्निर्ठ॑हृदयेनाशनिर्ठ॑हृदयाग्ग्रेणंपशुपतिंकृत्स्नहृदयेनभ

वँय्युक्ना ॥ शर्वम्मतंस्नाभ्यामीशानम्मुन्न्युनामहादेवमन्तःपर्शव्ये

नोग्ग्रन्देवँवंनिष्ठुनावसिष्ठहनुःशिङ्गीनिकोश्याभ्याम् ॥२१॥ उग्ग्रँल्लो १७

हितेनमित्रन्ठंसौब्वंत्येनरुद्द्रन्दौब्वंत्येनेन्द्रम्प्रक्रीडेनेमुरुतोबलेनसाद्ध्य
न्प्रमुदा॥भुवस्यकण्ठ्यंठंरुद्द्रस्यान्तःपार्श्व्व्यम्म्महादेवस्ययकृच्छर्वं
स्यवनिष्ठुःपंशुपतेःपुरीतत्॥२२॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्वस्तिनः
पूषाविश्वेवेदाः॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्पतिं
र्दधातु॥२३॥ पयःपृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः
॥पयस्वतीःप्प्रदिशःसन्तुमह्यम्॥२४॥ विष्ष्णोरराटमसिविष्ष्णोः
श्नप्त्रेस्थोविष्ष्णोःस्यूरसिविष्ष्णोर्द्ध्रुवोसि ॥ वैष्ष्णवमसिविष्ष्णवे
त्वा॥२५॥अग्निर्द्देवतावातोदेवतासूर्य्योदेवताचन्द्रमादेवतावसवोदेव

तांरुद्रादेवतांदित्यादेवतांमुरुतोंदेवताविश्श्वेदेवादेवताबृहुस्पतिर्द्देवते
न्द्रोदेवताव्वरुणोदेवता॥२६॥द्यौःशान्तिरुन्तरिक्षुर्ठंशान्तिःपृथिवीशा
न्तिरापुःशान्तिरोषधयुःशान्तिः॥ व्वनुस्पतयुःशान्तिर्विश्श्वेदेवाःशा
न्तिर्ब्रह्मुशान्तिःसर्व्वर्ठंशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥
॥२७॥इतिसर्ठंहितायांरुद्रपाठेषष्ठोऽध्यायः॥ ६॥ ७ ॥व्वाजश्श्चमेप्प्रसु
वश्श्चमेप्प्रयतिश्श्चमेप्प्रसितिश्श्चमेधीतिश्श्चमेक्क्रतुश्श्चमेस्वरश्श्चमेश्श्लोकश्श्च
मेश्श्रुवश्श्चमेश्श्रुतिश्श्चमेज्ज्योतिश्श्चमेस्वश्श्चमेयुज्ञेनकल्पन्ताम् ॥ १ ॥
प्प्राणश्श्चमेपानश्श्चमेव्यानश्श्चमेसश्श्चमेचित्तश्श्चमेऽआधीतश्श्चमेव्वाक्चमे

॥ श्रीगणेशाय नमः ॥ आचम्य प्राणानायम्य । देशकालौ संकीर्त्य
च । संकल्पः। अद्य पूर्वोच्चारितैवंगणविशेषणविशिष्टायां शुभपुण्यतिथौ
ममाऽऽत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षसि
द्धिद्वारा सर्वव्याधिनिरासपूर्वकं सर्वाभीष्टसिद्ध्यर्थं श्रीभवानीशङ्कर
देवताप्रीत्यर्थं च रुद्रैकादशिन्यभिषेकयुक्तं सकृदावर्तनाभिषेकयु
क्तं वा अमुकद्रव्येण रुद्राभिषेकमहं करिष्ये ॥ तदङ्गतया विहितान्
शरीरशुद्ध्यर्थं लघुषडङ्गन्यासाँश्च करिष्ये ॥ मनोजूतिरितिमन्त्रस्य
बृहस्पतिर्ऋषिः। बृहती छन्दः। बृहस्पतिर्देवता । हृदयन्यासे जपे वि

नियोगः ॥ ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनो
त्वरिष्टंय्यज्ञꣳसमिमन्दधातु ॥ व्विश्वेदेवासऽइहमादयन्तामो ३म्प्रतिष्ठ ॥ ॐ हृदयायनमः ॥ १ ॥ अबोध्यग्निरितिमन्त्रस्य बुधग
विष्ठिरा ऋषिः। त्रिष्टुप् छन्दः। अग्निर्देवता। शिरोन्यासे जपे विनियो
गः ॥ ॐ अबोध्यग्निः समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम्।
यह्वाऽइवप्प्रवयामुज्जिहानाःप्प्रभानवः सिस्रतेनाकमच्छ ॥ ॐ शिरसे
स्वाहा ॥ २ ॥ मूर्द्धानमितिमन्त्रस्य भरद्वाज ऋषिः। त्रिष्टुप् छन्दः।
अग्निर्देवता। शिखान्यासे जपे विनियोगः ॥ ॐ मूर्द्धानन्दिवोऽअरति

म्पृथिव्यावैश्वानरमृतऽआजातमग्निम् ॥ कविᳫँसम्म्राजमतिथिञ्जना
नामासन्नापात्रञ्जनयन्तदेवाः ॥ ॐ शिखायै वषट् ॥ ३ ॥ मर्म्माणित
इतिमन्त्रस्य अप्रातिरथ ऋषिः। विराट् छन्दः। मर्म्माणि देवता। कवच
न्यासे जपे विनियोगः ॥ ॐ मर्म्माणितेवर्म्मणाच्छादयामिसोम
स्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्वरीयोवरुणस्तेकृणोतुजयन्त
न्त्वानुदेवामदन्तु ॥ ॐ कवचायहुम् ॥ ४ ॥ विश्वतश्चक्षुरितिमन्त्र
स्य विश्वकर्मा भौवन ऋषिः। त्रिष्टुप् छन्दः। विश्वकर्मादेवता। नेत्रन्या
से जपे विनियोगः ॥ ॐ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरु

ताद्विश्वतंस्प्पात् ॥ सम्बाहुभ्यान्धमंतिसम्पतंत्रैर्द्यावाभूमींजनयंन्देव ऽएकंः ॥ ॐ नेत्रत्रयाय वौषट् ॥ ५ ॥ मानस्तोक इतिमन्त्रस्य परमेष्ठी ऋषिः । जगती छन्दः । एकरुद्रो देवता । अस्त्रन्यासे जपे विनियोगः ॥ ॐ मानंस्तोकेतनंयेमानुऽआयुंषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोंव्वीरान्नुंद्रभामिनोवधींर्हविष्मंन्तःसदमित्त्वांहवामहे ॥ ॐ अस्त्राय फट् ॥ ६ ॥ ॥ इति लघुषडङ्गन्यासाः ॥ ॥ ७ ॥

॥ श्रीगणेशायनमः ॥ ॥ हरिः॑ ॐ ॥ माच्छन्दः॑ प्प्रमाच्छन्दः॑ प्प्रतिमाच्छन्दोऽअस्रीवयुश्छन्दः॑ पुङ्क्तिश्छन्दऽउुष्णिक्छन्दोबृहतीच्छन्दोनुष्टुप्छन्दोविराट्छन्दोगायत्त्रीच्छन्दस्त्रिष्टुप्छन्दोजगतीच्छन्दः॑ ॥ १ ॥ पृथिवीच्छन्दोन्तरिक्षञ्छन्दोद्यौश्छन्दः॑ समाश्छन्दोनक्षत्राणिच्छन्दोव्वाक्छन्दोमनश्छन्दः॑ कृषिश्छन्दोहिरण्यञ्छन्दोगौश्छन्दोजाच्छन्दोऽश्वश्छन्दः॑ ॥ २ ॥ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम ॥ आहमजानिगर्ब्भधमात्वमजासिगर्ब्भधम् ॥ ३ ॥ गायत्त्रीत्रिष्टुब्जगत्यनुष्टु

२० प्पुङ्क्यासुह ॥ बृहुत्युष्णिहांकुकुप्सचीभिंःशम्म्यन्तुत्वा ॥ ४ ॥ द्विपंदाया॰श्चचतुष्पदास्त्रिपंदायाश्चुषट्पंदाः ॥ विच्छंन्दायाश्च्चसच्छंन्दाः सूचीभिंःशम्म्यन्तुत्वा ॥ ५ ॥ सुहस्तोंमाःसुहच्छंन्दसऽआवृतंःसुह प्प्रंमाऽऋषयःसुप्तदैव्यांः ॥ पूर्वैषाम्पन्थांमनुदृश्यधीराऽअन्वालैभिरेरुत्थ्यौनरश्मीन् ॥ ६ ॥ यज्जाग्ग्रंतोदरमुदैतिदैवुन्तदुंसुप्तस्युतथैवैतिं ॥ दूरङ्गुमञ्ज्योतिंषाञ्ज्योतिरेकुन्तन्मेमनंःशिवसंङ्कल्पमस्तु ॥ ७ ॥ येनुकम्र्माण्युपसौमनीषिणौयुज्ञेकृण्वन्तिविदथैषुधीराः ॥ यदंपूर्वंय्यक्षमुन्तःप्प्रुजानान्तन्मेमनंःशिवसंङ्कल्पमस्तु ॥ ८ ॥ यत्प्रुज्ञानंमुत

चेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्म्मान्नऽऋतेकिञ्चनक
र्म्मक्क्रियतेतन्मेमनःशिवसङ्कल्पमस्तु ॥ ९ ॥ येनेदम्भूतम्भुवनम्भ
विष्यत्परिगृहीतममृतेनसर्व्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मेम
नःशिवसङ्कल्पमस्तु ॥ १० ॥ यस्मिन्नृचःसामयजूंषियस्मिन्प्र
तिष्ठितारथनाभाविवाराः ॥ यस्मिँश्चित्तर्ठ०सर्व्वमोतम्प्रजानान्तन्मे
मनःशिवसङ्कल्पमस्तु ॥ ११ ॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनी
यतेभीशुभिर्व्वाजिनऽइव ॥ हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेमनःशिवस
ङ्कल्पमस्तु ॥ १२ ॥ इतिसर्ठ०हितायांरुद्रपाठेप्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥

रु॰ २

सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिꣳसर्वतःस्पृत्वात्यति
ष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएवेदꣳसर्वंयद्भूतंयच्चभाव्यम् ॥ उता
मृतत्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्या
याँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३ ॥
त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्राम
त्साशनानशनेऽअभि ॥ ४ ॥ ततोविराडजायतविराजोऽअधिपूरुषः ॥
सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञात्सर्व
हुतःसम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेवायव्यानारण्याग्ग्राम्म्या

अ॰ २ २

श्चुये ॥ ६॥ तस्माद्यज्ञात्सर्व्वहुतऽऋचुःसामानिजज्ञिरे ॥ छन्दांᳬसि
जज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥ ७ ॥ तस्म्मादश्श्वाऽअजाय
न्तुयेकेचोभुयादतः ॥ गावोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजाव
यः ॥ ८ ॥ तँय्युज्ञम्बुर्हिषिप्प्रौक्षुन्न्पुरुषञ्जातमग्ग्रुतः ॥ तेनदेवाऽअ
यजन्तसाध्याऽऋषयश्च्चुये ॥ ९ ॥ यत्पुरुषँव्यदधुःकतिधाव्व्यकल्पय
न् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते ॥ १० ॥ ब्राह्मु
णोस्युमुखमासीद्बाहूराजुन्न्यःकृतः ॥ ऊरूतदस्युयद्वैश्यःपुद्भ्याᳬशू
द्रोऽअजायत ॥११॥ चन्द्रमामनसोजातश्च्चक्षोःसूर्य्योऽअजायत ॥

श्रोत्राद्वायुश्चप्प्राणश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआसी
दन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत ॥ पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथालो
काँ२ ॥ऽअकल्पयन् ॥ १३ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥
वसन्तोस्यासीदाज्ज्यङ्ग्रीष्मऽइध्मःशरद्धविः ॥ १४ ॥ सप्ता
स्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञन्तन्वानाऽअब
ध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणि
प्रथमान्यासन् ॥ तेहनाकम्महिमानःसचन्तयत्रपूर्व्वेसाध्याःसन्ति
देवाः ॥ १६ ॥ अद्भ्यःसम्भृतःपृथिव्यैरसाच्चविश्वकर्म्मणःसमवर्त्तता

ग्ग्रे ॥ तस्युत्वष्ट्टांव्विदंधंद्रूपमेंतितन्न्मर्त्त्यस्यदेवुत्वमाजानुमग्ग्रे ॥१७॥
व्वेदाहमेतम्पुरुषम्मुहान्तंमादित्यवंर्णन्तमंसः पुरस्तांत् ॥ तमेवव्विदि
त्वातिमृत्युमेंतिनान्न्यः पन्थांव्विद्युतेयनाय ॥ १८ ॥ प्प्रजापंतिश्चरति
गर्ब्भेंऽअन्तरजांयमानोबंहुधांव्विजांयते ॥ तस्युयोनिम्पंरिपश्यन्तिधी
रास्तास्मिन्न्हतस्त्थुर्ब्भुवंनानिव्विश्वां ॥१९॥ योदेवेब्भ्यंऽआतपंतियो
देवानाम्पुरोहिंतः ॥ पूर्व्वोयोदेवेब्भ्योजातोनमोरुचायुब्राह्मंये ॥२०॥
रुचम्ब्राह्मञ्जुनयंन्तोदेवाऽअग्ग्रेतदंब्रुवन् ॥ यस्त्वैवम्ब्रांह्मणोव्विद्या
त्तस्यंदेवाऽअंसुन्नवशें ॥ २१ ॥ श्रीश्चंतेलुक्ष्म्मीश्चुपत्न्नयांवहोरात्रे

पार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मंऽइषाणस
र्वलोकम्मंऽइषाण ॥ २२ ॥ ॥ इतिसꣳहितायांरुद्रपाठेद्वितीयोऽध्या
यः ॥ २ ॥ ॥ ध्व ॥ आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्ष
णीनाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरःशतꣳसेनाऽअजयत्साकमि
न्द्रः ॥ १ ॥ सङ्क्रन्दनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णु
ना ॥ तदिन्द्रेणजयततत्सहध्वंयुधोनरऽइषुहस्तेनवृष्णा ॥ २ ॥ सऽ
इषुहस्तैःसनिषङ्गिभिर्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन ॥ सꣳसृष्टजि
त्सोमपाबाहुशर्ध्युग्रधन्वाप्रतिहिताभिरस्ता ॥ ३ ॥ बृहस्पतेपरिदी

यारथेनरक्षोहामित्राँ२॥ऽअपबाधमानः ॥ प्प्रभुञ्जन्त्सेनाःप्प्रमृणोयु
धाजयंन्नस्माकमेद्धयवितारथानाम् ॥४॥ बलविज्ञायस्त्थविरःप्प्रवी
रःसहंस्वान्वाजीसहमानऽउग्ग्रः ॥ अभिवीरोऽअभिसंत्वासहोजाजैत्र
मिन्द्ररथमातिष्ठगोवित् ॥५॥ गोत्त्रभिदंङ्गोविदँव्वज्ज्रबाहुञ्जयन्तमज्म्म
प्प्रमृणन्तमोजसा ॥ इमर्ठ०सजाताऽअनुवीरयद्धमिन्द्रर्ठ०सखायोऽअनु
सर्ठ०रभद्धम् ॥ ६ ॥ अभिगोत्त्राणिसहसागाहमानोदयोव्वीरःशतम
न्न्युरिन्द्रः ॥ दुश्च्यवनःपृतनाषाडयुद्धयोस्म्माकर्ठ०सेनाऽअवतुप्प्रयु
त्सु ॥७॥ इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञःपुरऽएतुसोमः ॥

देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ॥ ८ ॥ इन्द्र
स्यवृष्णोव्वरुणस्यराज्ञऽआदित्यानाम्मरुताꣳशर्द्धऽउग्ग्रम् ॥ महा
मनसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जयतामुदस्थात् ॥ ९ ॥ उद्ध
र्षयमघवन्नायुधान्न्युत्सत्त्वनाम्मामकानाम्मनाꣳसि ॥ उद्वृत्रहन्वा
जिनाँव्वाजिनान्न्युद्रथानाञ्जयताँय्यन्तुघोषाः ॥ १० ॥ अस्म्माकमि
न्द्रःसमृतेषुद्ध्वजेष्ष्वस्म्माकँय्याऽइषवस्ताजयन्तु ॥ अस्म्माकँव्वी
राऽउत्तरेभवन्त्वस्म्माँ२॥ऽउदेवाऽअवताहवेषु ॥ ११ ॥ अमीषाञ्चि
त्तम्प्प्रतिलोभयन्तीगृहाणाङ्गान्न्यप्प्वेपरेहि ॥ अभिप्प्रेहिनिर्द्दहहृत्सु

शोकैरन्धेनामित्त्रास्तमंसासचन्ताम् ॥ १२ ॥ अवंसृष्टापरापतशरं
व्येब्रह्मसंसठंशिते ॥ गच्छामित्त्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः
॥ १३ ॥ प्रेताजयंतानरऽइन्द्रोवःशर्म्मंयच्छतु ॥ उग्रावंःसन्तुबाहवो
नाधृष्याथथासंथ ॥ १४ ॥ असौय्यासेनामरुतःपरेषामभ्यैतिनऽ
ओजंसास्पर्द्धमाना ॥ ताङ्गूहततमसापंव्रतेनयथामीऽअन्योऽअन्य
न्नजानन् ॥ १५ ॥ यत्रंबाणाःसम्पतंन्तिकुमाराव्विशिखाऽइव ॥ तन्नऽ
इन्द्रोबृहस्पतिरदितिःशर्म्मंयच्छतुव्विश्वाहाशर्म्मंयच्छतु ॥ १६ ॥
मर्म्माणितेवर्म्मणाच्छादयामिसोमंस्त्वाराजामृतेनानुवस्ताम् ॥ उ

रोर्व्वरीयुोव्वरुणस्तेकृणोतुजयन्तुन्त्वानुदेवामदन्तु ॥ १७ ॥ ॥ इति
सर्ठंहितायांरुद्रजाप्येतृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ व्विभ्राड्बृह
त्पिबतुसोम्म्यम्मद्ध्वायुर्दधद्यज्ञपंतावविह्रुतम् ॥ व्वातजूतोयोऽअभिर
क्षतित्क्मनाम्प्रजाःपुपोषपुरुधाव्विराजति ॥ १ ॥ उदुत्यञ्जातवेदसन्दे
वँव्वहन्तिकेतवः ॥ दृशेव्विश्श्वायसूर्य्यम् ॥ २ ॥ येनापावकचक्षसाभु
रण्यन्तञ्जनाँ२॥ऽअनु ॥ त्वँव्वरुणपश्यसि ॥ ३ ॥ दैव्व्यावद्ध्वर्य्यूऽआग
तर्ठंरथेनसूर्य्यत्वचा ॥ मद्ध्वायज्ञर्ठंसमञ्जाथे ॥ तम्प्रत्क्नथायव्वेनश्चि
त्रन्देवानाम् ॥ ४ ॥ तम्प्रत्क्नथापूर्व्वथाव्विश्श्वथेमथाज्ज्येष्ठतातिम्बर्हि

षदंᳬस्वाद्विदम् ॥ प्प्रतीचीनँवृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुव्व
र्द्धसे ॥ ५ ॥ अयँव्वेनश्चोदयत्पृश्निगर्ब्भाज्ज्योतिर्ज्जरायूरजंसोव्विमानै ॥
इममपाᳬसङ्गमेसूर्य्यस्यशिशुन्नव्विप्प्रामतिभीरिहन्ति ॥ ६ ॥ चित्र
न्देवानामुदंगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्ग्नेः ॥ आप्प्राद्यावापृथि
वीऽअन्तरिक्षᳬसूर्य्यऽआत्माजगतस्तस्थषश्च ॥ ७ ॥ आनऽइडा
भिर्व्विदथेसुशस्तिव्विश्वानरःसवितादेवऽएतु ॥ अपियथायुवानोमत्स
थानोव्विश्वञ्जगदभिपित्वेमनीषा ॥ ८ ॥ यदद्यकच्चवृत्रहन्नुदगाऽअभि
सूर्य्य ॥ सर्व्वन्तदिन्द्रतेव्वशे ॥ ९ ॥ तरणिर्व्विश्वदर्शतोज्ज्योतिष्कृदसि

सूर्य्यं ॥ विश्वमाभासिरोचनम् ॥ १० ॥ तत्सूर्य्यस्यदेवत्वन्तन्महि
त्वम्मध्याकर्त्तोर्व्विततंसञ्जभार ॥ यदेदयुक्तहरितः सधस्थादाद्रात्री
वासस्तनुतेसिमस्मै ॥ ११ ॥ तन्मित्रस्यवरुणस्याभिचक्षेसूर्य्योरू
पङ्कृणुतेद्योरुपस्थे ॥ अनन्तमन्यद्रुशदस्यपाजः कृष्णमन्यद्धरितः स
म्भरन्ति ॥ १२ ॥ बण्महाँ २ ॥ ऽअसिसूर्य्यबडादित्यमहाँ २ ॥ ऽअसि ॥
महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ २ ॥ ऽअसि ॥ १३ ॥ बट्सू
र्य्यश्रवसामहाँ २ ॥ ऽअसिसत्रादेवमहाँ २ ॥ ऽअसि ॥ मह्नादेवानामसु
र्य्यः पुरोहितोविभुज्योतिरदाभ्यम् ॥ १४ ॥ श्रायन्तऽइवसूर्य्यंवि

श्चोदिन्द्रस्यभक्षत ॥ वसूंनिजातेजनंमानुऽओजंसाप्प्रातिंभागन्नदी
धिम ॥ १५ ॥ अद्यादेवाऽउदिंतासूर्य्यस्यनिरंहंसःपिपृतानिरंव
द्यात् ॥ तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः
॥१६॥ आकृष्णेनरजंसावर्त्तमानोनिवेशयंन्नमृतम्मर्त्यञ्च ॥ हिरण्ययें
नसवितारथेनादेवोयांतिभुवनानिपश्यंन् ॥ १७ ॥ ॥ इति सहिं
तायांरुद्रपाठेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॐ नमंस्तेरुद्रम
न्यवऽउतोतऽइषवेनमः ॥ बाहुभ्यामुततेनमः ॥ १ ॥ यातेरुद्रशि
वातनूरघोरापापकाशिनी ॥ तयांनस्तन्वाशन्तंमयागिरिंशन्ताभि

रु० चांकशीहि ॥ २ ॥ यामिषुङ्गिरिशन्तुहस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरि अ०
८ त्रुताङ्कुरुमाहिर्ठ᳘सीःपुरुंषञ्जगत् ॥ ३ ॥ शिवेनुव्वचंसात्वागिरिशाच्छा ५
व्वदामसि ॥ यथानुःसर्व्वमिज्जगंदयुक्ष्मर्ठ᳘सुमनाऽअसत् ॥४॥ अद्धचवो
चदधिवुक्ताप्प्रथमोदैव्योभिषक् ॥ अहीँश्चुसर्व्वाञ्जम्भयुन्त्सर्व्वाश्चयातु
धान्योधुराचीःपरांसुव ॥ ५ ॥ असौयस्ताम्रोऽअंरुणऽउतबुभ्रुःसुम-
ङ्गलः ॥ येचैनर्ठ᳘रुद्राऽअुभितोदिक्षुश्रिताःसंहस्रशोवैषाᳬहेडंऽईमहे
॥६॥ असौयोवसर्प्पतिनीलंग्ग्रीवोविलोहितः ॥ उतैनंङ्गोपाऽअंदृश्श्रन्न
दृश्श्रन्नुदहार्य्यःसदृष्टोमृडयातिनः ॥ ७ ॥ नमोस्तनीलंग्ग्रीवायस ८

हस्राक्षायमीढुषे ॥ अथोयेऽअस्युसत्त्वानोहन्तेभ्योकरन्नमः ॥ ८ ॥
प्रमुञ्चधन्वनुस्त्वमुभयोरात्त्वन्योर्ज्ज्याम् ॥ याश्चतेहस्तुऽइषवुःपराता
भगवोवप ॥ ९ ॥ विज्ज्युन्धनुःकपर्दिनोविशल्योबाणवाँ २ ॥ ऽउत ।
अनेशन्नस्युयाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥ यातेहेतिम्मीढु
ष्टमुहस्तेबभवतेधनः ॥ तयास्मान्विश्वतुस्त्वमयुक्ष्मयापरिभुज ॥
॥ ११ ॥ परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः ॥ अथोयऽइषु
धिस्तवारेऽअस्मन्निधेहितम् ॥ १२ ॥ अवतत्त्युधनुष्ट्वंसहस्राक्षशते
षुधे ॥ निशीर्य्यशुल्यानाम्मुखाशिवोनःसुमनाभव ॥ १३ ॥ नमस्तुऽ

रु० ९

आयुंधायानांततायधृष्णवे ॥ उभाब्भ्यांमुततेनमोबाहुभ्यान्तवधन्वंने ॥ १४ ॥ मानोमुहान्तंमुतमानोऽअब्भंकम्मानुऽउक्षन्तमुतमानऽउक्षितम् ॥ मानोव्वधीःपितरम्मोतमातरम्मानःप्प्रियास्तन्न्वोरुद्ररीरिषः ॥ १५ ॥ मानंस्तोकेतनंयेमानुऽआयुंषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्नुंद्रभामिनोव्वधीर्हविष्म्मंन्तःसदमित्त्वांहवामहे ॥१६॥ नमोहिरंण्यबाहवेसेनान्न्येदिशाञ्चपतंयेनमोनमोवृक्षेब्भ्योहरिंकेशेब्भ्यःपशूनाम्पतंयेनमोनमः शुष्प्पञ्जंरायत्त्विषीमतेपथीनाम्पतंयेनमोनमोहरिंकेशायोपवीतिनेपुष्टानाम्पतंयेनमोनमोबब्भ्लुशा

अ० ९ ९

यं ॥ १७ ॥ नमोबभ्लुशायव्याधिनेन्नानाम्पतयेनमोनमोभुवस्यहे
त्यैजगताम्पतयेनमोनमोरुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनमःस
तायाहन्त्यैवनानाम्पतयेनमोनमोरोहिताय ॥ १८ ॥ नमोरोहिताय
स्थपतयेवृक्षाणाम्पतयेनमोनमोभुवन्तयेवारिवस्कृतायौषधीनाम्प-
तयेनमोनमोमन्त्रिणेवाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्घोषा
याक्रन्दयतेपत्तीनाम्पतयेनमोनमःकृत्स्नाय ॥ १९ ॥ नमःकृत्स्नायत
याधावतेसत्वनाम्पतयेनमोनमःसहमानायनिव्याधिनऽआव्याधि
नीनाम्पतयेनमोनमोनिषङ्गिणेककुभायस्तेनानाम्पतयेनमोनमोनि

रु० अ०
१० ६

चेरवैपरिचुरायारंण्यानुाम्पतंयेनमोनमोवञ्चंते ॥ २० ॥ नमोवञ्चंते
परिवञ्चंतेस्तायूनाम्पतंयेनमोनमोनिषङ्गिणंऽइषुधिमतेतस्कराणाम्प
तंयेनमोनमंःसृकायिभ्योजिघांꣳसद्भ्योमुष्णतामपतंयेनमोनमो
सिमद्भ्योनक्तंञ्चरंद्भ्योविकृन्तानाम्पतंयेनमंः ॥ २१ ॥ नमंऽउष्णीषि
णेगिरिचरायंकुलुञ्चानाम्पतंयेनमोनमंऽइषुमद्भ्योधन्वायिभ्यंश्चवो
नमोनमंऽआतन्वानेभ्यंःप्रतिदधानेभ्यश्चवोनमोनमंऽआयच्छं
द्भ्योस्यंद्भ्यश्चवोनमोनमोविसृजद्भ्यंः ॥ २२ ॥ नमोविसृजद्भ्योवि
द्ध्यंद्भ्यश्चवोनमोनमंःस्वपद्भ्योजाग्रंद्भ्यश्चवोनमोनमंःशयानेभ्य

१०

ऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमोनमःसुभा
भ्यः ॥ २३ ॥ नमःसुभाभ्यःसुभापतिभ्यश्चवोनमोनमोश्श्वेभ्यो
ऽश्वपतिभ्यश्चवोनमोनमऽआव्याधिनीभ्योविविध्यन्तीभ्यश्चवोन
मोनमऽउगणाभ्यस्तृꣳहतीभ्यश्चवोनमोनमोगणेभ्यः॥२४॥ नमो
गणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमो
नमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपे
भ्यश्चवोनमोनमःसेनाभ्यः॥ २५ ॥ नमःसेनाभ्यःसेनानिभ्यश्च
वोनमोनमोरथिभ्योऽअरथेभ्यश्चवोनमोनमःक्षत्तृभ्यःसङ्ग्रहीतृ

भ्यश्चवोनमोनमोमहद्भ्योऽअर्भकेभ्यश्चवोनमः ॥ २६ ॥ नमस्तक्ष
भ्योरथकारेभ्यश्चवोनमोनमःकुलालेभ्यःकर्म्मारेभ्यश्चवोनमो
नमोनिषादेभ्यःपुञ्जिष्ठेभ्यश्चवोनमोनमःश्वनिभ्योमृगयुभ्यश्च
वोनमोनमःश्वभ्यः ॥ २७ ॥ नमःश्वभ्यःश्वपतिभ्यश्चवोनमोन
मोभवायचरुद्रायचनमःशर्वायचपशुपतयेचनमोनीलग्रीवायचशि
तिकण्ठायचनमःकपर्दिने ॥ २८ ॥ नमःकपर्दिनेचव्युप्तकेशायच
नमःसहस्राक्षायचशतधन्वनेच ॥ नमोगिरशयायचशिपिविष्टाय
चनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय ॥ २९ ॥ नमोह्रस्वायचवा

मुनायंचुनमोबृहतेचुब्वर्षीयसेचुनमोवृद्धायचसुवृधेचुनमोग्ग्र्यायचप्प्र
थुमायंचुनमऽआशवे ॥ ३० ॥ नमऽआशवेचाजिरायंचुनमुःशीग्घ्र्याय
चुशीब्भ्यायचुनमुऽऊर्म्म्यायचावस्वुन्न्यायचुनमोनादेयायंचुद्दीप्प्या
यच ॥ ३१ ॥ नमोज्ज्येष्ठायंचकनिष्ठायचुनमः पूर्व्वजायंचापरजायंचु
नमोमध्यमायंचापगल्भायंचुनमोजघन्न्यायचबुद्ध्न्यायचुनमुःसो
भ्यायं ॥ ३२ ॥ नमुःसोभ्यायंचप्प्रतिसर्व्यायचुनमोयाम्म्याय
चुक्षेम्म्यायचुनमुःश्श्लोक्क्यायचावसान्न्यायचुनमऽउर्व्वर्य्यायचुख
ल्ल्यायचुनमोव्वन्न्याय ॥ ३३ ॥ नमोव्वन्न्यायचुकक्ष्यायचुनमः श्श्रुवा

रु०
१२

यंचप्प्रतिश्श्रुवायंचुनमं॑ऽआशुषेंणायचाशुरंथायचुनमु॑श्शूरांयचावभे
दिनैंचुनमोंबिल्म्मिनें ॥ ३४ ॥ नमोंबिल्म्मिनेंचकवुचिनेंचुनमों
व्वुर्म्मिणेंचव्वरुथिनेंचुनमं॑श्श्रुतायंचश्श्रुतसेनायंचुनमोंदुन्दुभ्यायचा
हनुन्न्यायचुनमोंधृष्णवें ॥ ३५ ॥ नमोंधृष्णवेंचप्प्रमृशायंचुनमों
निषुङ्गिणेंचेषुधिमतेंचुनमंस्तीक्ष्णेषंवेचायुधिनेंचुनमं॑स्वायुधायंचस
धन्न्वंनेच ॥ ३६ ॥ नमु॑स्स्रुत्यांयचुपत्थ्यांयचुनमु॑क्काटच्यांयचुनी
प्प्यांयचुनमु॑कुल्ल्यांयचसरुस्स्यायचुनमोंनादेयायंचव्वैशुन्तायंचुनमु॑
कूप्प्यांय ॥ ३७ ॥ नमु॑कूप्प्यांयचावुटच्यायचुनमोव्वीद्ध्र्यांयचातुप्प्या

अ०
६
१२

हंकरिष्ये ॐ आपोदेवामधुमतीरगृभ्णन्नूर्जस्वतीरायस्वश्चितानाः । याभिर्मित्रावरु
णावभ्यषिंचन्याभिरिंद्रमनयन्नत्यरातीः । अद्यामुकगोत्रस्यामुकप्रेतस्यनारायणब
लिविहितैकादशश्राद्धान्तर्गतप्रथमेविष्णुपिंडेजलधारातेनमः । इतिद्वावंजलीदद्यात्
७।७।४ॐउपयामगृहीतोस्यंतर्यच्छमघवन्पाहिसोममुरुष्यरायऽएषोयजस्व । अद्या०
प्रेतस्यनारायणबलौ विहितैकादशश्राद्धांतर्गतद्वितीयेशिवपिंडेजल० ते नमःद्वावंजली
दद्यात् २।३।३।२ॐ येनापावकचक्षसाभुरण्यंतंजनाँऽअनु । त्वंवरुणपश्यसि अद्या०
प्रेतस्यनारायणबलौ विहितैका० श्राद्धांतर्गततृतीयेसपरिवारयमपिंडेजल० नमः ।
द्विवारम् ३ । ७ । १९ ॐ येदेवासोदिव्येकादशस्थपृथिव्यामध्येकादशस्थ ॥ अप्सु
क्षितोमहिनैकादशस्थतेदेवासोयज्ञमिमञ्जुषध्वम् । अद्यामुकगोत्र० प्रे० ना० बलौ०
एका० श्राद्धांतर्गतचतुर्थेसोमराज० जल० नमः ४ । ६ । २१ ॐ समुद्रंग

हंकरिष्ये ॐ आपोदेवामधुमतीरगृभ्णन्नूर्जस्वतीरायस्वश्चितानाः । यासिर्मित्रावरुणावभ्यषिंचन्याभिरिंद्रमनयन्नत्यरातीः । अद्यामुकगोत्रस्यामुकप्रेतस्यनारायणबलिविहितैकादशश्राद्धान्तर्गतप्रथमेविष्णुपिंडेजलधारातेनमः । इतिद्वावंजलीदद्यात ७।७।४ॐउपयामगृहीतोस्यंतर्यच्छमघवन्पाहिसोममुरुष्यरायऽएषोयजस्व । अद्या० प्रेतस्यनारायणबलौ विहितैकादशश्राद्धांतर्गतद्वितीयेशिवपिंडेजल० ते नमःद्वावंजली दद्यात्२।३३।३२ॐ येनापावकचक्षसाभुरण्यंतंजनांऽअनु । त्वंवरुणपश्यसि अद्या० प्रेतस्यनारायणबलौ विहितैका० श्राद्धांतर्गततृतीयेसपरिवारयमपिंडेजल० नमः । द्विवारम् ३ । ७ । १९ ॐ येदेवासोदिव्येकादशस्थपृथिव्यामध्येकादशस्थ ॥ अप्सुक्षितोमहिनैकादशस्थतेदेवासोयज्ञमिमञ्जुषध्वम् । अद्यामुकगोत्र० प्रे० ना० बलौ० एका० श्राद्धांतर्गतचतुर्थेसोमराज० जल० नमः ४ । ६ । २१ ॐ समुद्रंग

तृमन् ६ रुद्ररूप ७ मृत्यो ८ पुरुष ९। अपसव्यम्। अद्यामुकगोत्रामुकप्रेतनारायणब
लिविहितैकादशश्राद्धपिंडस्थानेअत्रावनेनिक्ष्वतेमयादीयतेतवोपतिष्ठताम्। इतिदश
मवेदिकायामवनेजनंकुशोपरिदत्त्वा पुनःसव्येन ॐ अद्यविष्णोअत्रावनेनिक्ष्वते
नमः एवमेकादशस्थानेष्ववनेजनंदत्त्वा ततस्तिलघृतमधुयुतेनान्नेनपिंडान्कृत्वा
घृतमधुभ्यामभिघार्य एकंपिंडंवामहस्तेकृत्वादक्षिणहस्तेनकुशयवजलान्यादाय
ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यनारायणबलिंविहितैकादशश्राद्धे विष्णोएषतेपिंडो
नमइतिवामान्वारब्धदक्षिणहस्तेनावनेजनस्थानेपिंडंदद्यात्। एवं शिव २ यमसप
रिवार ३ सोमराज ४ हव्यवाहन ५ सोमपितृमन् ६ रुद्ररूप ७ मृत्यो ८ पुरुष ९।
अपसव्यम्। ॐ अद्यामुकगोत्रामुकप्रेतनारायणबलिविहितैकादशश्राद्धेएषपिंडस्ते
मयादीयतेतवोपतिष्ठताम्। इतिदशमंपिंडंदत्त्वा ततःसव्येनविष्णो० नमः ११ एवंसर्वे

५

पांपिंडान्नदत्त्वा ततोदर्भमूलेकरंप्रोञ्छ्यआचम्यहरिंस्मृत्वा ततोऽवनेजनपात्रंदत्त्वाव
शिष्टजलयुतंवामहस्तेकृत्वादक्षिणहस्तेन कुशत्रययवजलान्यादाय ॐ अद्यामुक
गोत्रस्यामुकप्रेतस्यामुकदुर्मरणनिमित्तकनारायणबलिविहितैकादशश्राद्धे विष्णोप्र
त्यवनेनिक्ष्वतेनमः एवंद्वितीयादिवेदिकायांचतत्र शिव प्रत्यवनेनिक्ष्वतेनमः २ यमस
परिवार ३ सोमराज ४ हव्यवाहन ५ सोमपितृमन् ६ रुद्ररूप ७ मृत्यो ८ पुरुष ९ ।
अपसव्यम् । ॐअद्यामुकगोत्रामुकप्रेतनारायणबलिविहितैकादशश्राद्धपिंडे प्रत्य
वनेनिक्ष्वते मयादीयतेतवोपतिष्ठताम् । इतिदशमपिंडोपरिप्रत्यवनेजनंदद्यात । पुनः
सव्येन अद्या॰श्राद्धे विष्णोप्रत्यवनेनिक्ष्वतेनमः एवंप्रत्यवनेजनंदद्यात् । ततोनीवींवि
स्रस्याचम्य वामेनपाणिनाधृतंसूत्रंदक्षिणेनादाय उभाभ्यां पिंडोपरिॐएतत्तेविष्णो
वासइतिसूत्रंधृत्वा एवंशिवादीनामपि । दशममपसव्येन एतत्तेपितर्वास इतिसूत्रं

धृत्वा पुनरेकादशेसव्येनएतत्तेविष्णोवासः कुशादीन्यादाय । ॐ अद्यामुकगोत्रस्य अमुकप्रेतस्यनारायणबलिविहितैकादशश्राद्धपिंडे विष्णोएतद्वासस्तेनमः । एवं शिव २ यमसपरिवार ३ सोमराज ४ हव्यवाहन ५ सोमपितृमन् ६ रुद्ररूप ७ मृत्यो ८ पुरुष ९ । अपसव्यम् । ॐ अद्यामुकगोत्रामुकप्रेतनारायणबलिविहितैकादशश्राद्धपिंडे एतद्वासस्तेमयादीयतेतवोपतिष्ठतामितिसूत्रमुत्सृजेत् । ततःसव्येनैकादशेविष्णुपिंडेच पूर्ववत्सूत्रमुत्सृजेत । ततस्तूष्णीं गंधपुष्पधूपदीप तांबूलपूगीफलानिदद्यात । ततःपिंडशेषान्नंपिंडसमीपेविकीर्य ततःएभिःपिंडदानैः अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्तिरस्तु उत्तमलोकावाप्तिरस्तु । ततोंजलिदानम् । ॐअद्यामुकगोत्रस्यामुकप्रेतस्यपरलोके महातृषानिवारणार्थम् अमुकदुर्मरण निमित्तकनारायणबलिविहितैकादशश्राद्धेपिण्डोपरि एकैकमंत्रेणद्विर्द्विरंजलिदानम

